IJRAR.ORG E-ISSN: 2348-1269, P-ISSN: 2349-5138

INTERNATIONAL JOURNAL OF RESEARCH AND ANALYTICAL REVIEWS (IJRAR) | IJRAR.ORG

An International Open Access, Peer-reviewed, Refereed Journal

# विश्वामित्रमहर्षिः - विश्वस्यादर्शमूर्तिः

**शोधसारः**

**- Dr. Kurella Ahalya**
Asst. Professor of Sanskrit
Govt. Degree College
Malkajgiri – Hyderabad

DOI: 10.56975/ijrar.v13i1.326978

सनातनधार्मिकग्रन्थाः मनुष्यान् सन्मार्गे नयन्ति । रामायणमहाकाव्ये विश्वामित्रमहर्षिः विश्वस्यादर्शमूर्तिः भवति। प्रथमस्तरे दुष्टोऽपि नरः यत्नेन क्रमेण शिष्टो भवतीति विश्वामित्रजीवनेन ज्ञायते। गाधेः पुत्रो विश्वामित्रः कामधेनुकृपापात्रेण वसिष्ठेन ससैन्य आतिथ्येन सत्कृतः । तादृश। कामधेनुं ददातु मध्यमिति सः वसिष्ठमयाचत । सः सामदानभेददण्डोपायैः तां धेनुं प्राप्तमयतत । वसिष्ठेन पराजितः सः क्षात्रबलात् ब्रह्मबलं महीयसीति ज्ञात्वा ब्रह्मर्षिः भवितुं तपश्चकार । अनेकवारं तपोभङ्गं प्राप्यापि अविरामयत्नेन सः अन्ते ब्रह्मर्षिरभवत् ।

विश्वामित्रमहर्षिः विश्वस्यादर्शमूर्तिः इति वक्तुं केचन दृष्टान्ताः अधो दीयन्ते -

प्रायो मानवा प्रकामकामाः भवन्ति । स्वमनोरथफलसिद्धये सामदानभेददण्डोपायान् प्रयुञ्जीयुः। अयं विषयः कौटिलीयेऽर्थशास्त्र, रामायणे च प्रोक्तः।

मनुष्याः स्वमनोरथान् हिंसामार्गेण साधयन्ति । किन्तु अहिंसामार्ग-मनुसृत्यैव मनोरथसिद्धिं प्राप्नुयात्। अयं विषयः भगवद्गीतायां, पातञ्जल योगदर्शने चोक्तः।

असाधुमनोरथार्थमपि अविरामेण यत्नं कुर्वन् नरः अन्ते शिष्टमनोरथकामो भवति ।

शरणागतरक्षणं कुर्यात् । मनुष्यो दयालुर्भवेत् । उत्तमाः आरब्धं कर्म तत्फलसिद्धिपर्यन्तं कुर्वन्ति ।

प्रथमस्तरे जितेन्द्रियत्वं नास्त्यपि पौनःपुन्ययत्नेन नरः सिद्धिं प्राप्नोति ।

क्रोधाविष्टः कार्यसिद्धिं नाप्नोति । मनुष्यः दुर्जनास्थितितः दीक्षया अविरामयत्नेन च सज्जनस्थितिं प्राप्तुं शक्नोति ।

आधुनिककाले बहनों जनाः दुर्जनास्थितितः सज्जनस्थितिं प्राप्तुं न यतन्ते । तेभ्यः विश्वामित्रमहर्षिः आदर्शमूर्तिर्भवति । दृष्टान्तेषु प्रोक्तसर्व-विषयेषु विश्वामित्रमहर्षिः विश्वस्थादर्शमूर्तिर्भवति ।

**Key words -** मनुष्यः अविरामयत्नं कुर्यात् ।

# विश्वामित्रमहर्षिः - विश्वस्यादर्शमूर्तिः

**अवतारिका –** सनातनधार्मिकग्रन्थाः मनुष्यान् सज्जनान् कर्तुमतीव प्रभावशालिनः भवन्ति । तेषु रामायणमहाकाव्यमन्यतमं भवति । रामायणे विश्वामित्रमहर्षिः यत्नेन स्वजीवनमादर्शवन्तमकरोत् । अतः विश्वामित्रः विश्वस्यादर्शमूर्तिः इति वक्तुं शक्यते । 'प्रायः मनुष्यः जन्मतः एव सज्जनो न भवति, जीवनयाने क्रमेण यत्नेन च स्वदुर्गुणान् एकैकशः व्यक्त्वा अन्ते सज्जनो भवतीति' विश्वामित्रस्य जीवनेन ज्ञायते ।

**विश्वामित्रमहर्षिः -** पुरा प्रजापतिसुतः कुशो नाम महीपतिरासीत् । तस्य पुत्रः कुशनाभः धार्मिकः आसीत् । कुशनाभस्य गाधिर्नाम पुत्रः आसीत्। गाधेः पुत्रः एव विश्वामित्रः। एकदा राजा विश्वामित्रः मेदिनी परिचक्राम।[1] तस्मिन्नवसरे सः वसिष्ठाश्रमे जगाम । वसिष्ठः कामधेनुकृपया विश्वामित्रस्य ससैन्यस्य आतिथ्यमदात्।[2] तदा विश्वामित्रः 'कामधेनुं मह्यं ददातु' इति वसिष्ठं प्रार्थयामास । परन्तु, वसिष्ठः तस्य प्रार्थनां नाङ्गीचकार । ततो विश्वामित्रो युद्धमकरोत् । परन्तु, सः वसिष्ठेन पराजितवान् । अतो विश्वामित्रः पुत्रमेकं 'राज्यं पालय' इत्युक्त्वा वने तपश्चकार । शिवानुग्रहेण शस्त्रास्त्रबलोपेतस्सन् पुनः वसिष्ठेन युद्धमकरोत् । परन्तु वसिष्ठस्य ब्रह्मबलेन विश्वामित्रस्य क्षात्रबलं निर्वीर्यमभूत् । तदा विश्वामित्रः ब्रह्मबलस्य माहात्म्यमजानात् ।[3]

**'धिग बले क्षत्रियबलं ब्रह्मतेजोबले बलम् ।**
**एकेन ब्रह्मदण्डेन सर्वास्त्राणि हतानि मे ॥'[4]** (रामायणम् - बालकाण्डः - 56-23)

ततो विश्वामित्रः ब्रह्मर्षिः भवितुं तपश्चकार । एकैकस्यां दिशायां बहुवारं तस्य तपोभङ्गमभूत् । तथापि सः दीक्षया ब्रह्मर्षित्व-प्राप्तये तपः कर्तुं न विरराम । अन्ते सः पूर्वस्या दिशायाँ तपः कृत्वा ब्रह्मर्षिरभवत् ।[5]

**विश्वामित्रमहर्षिः - विश्वस्यादर्शमूर्तिः-** मानवानां कामनाः अधिकास्सन्ति । मनुष्याणां सहजत्वेन कानिचन लक्षणानि सान्त। सर्वसुखानि आत्मनः एव स्युः, अन्ये जनाः स्वापेक्षया न्यूनाः भवेयुः, सुखसाधनं स्वसमीपे एव विधेत' इत्यादिदुष्टविचाराः मनुष्यस्य सन्ति। अतः विश्वामित्रः कामधेनोः प्रयोजनं प्रत्यक्षतया वीक्ष्य तामैच्छत् । सामदानभेददण्डोपायैः तां नेतुं सः ऐच्छत् । प्रायो नरः स्वाभीष्टसिद्धिं सामदानभेददण्डोपायैः प्राप्तुमिच्छति। अयं विषयः कौटिलीयार्थ शास्त्रे एवं कथितः –

**'उपायाः सामोपप्रदानभेददण्डाः।'[7]**

(कौटिलीयम् अर्थशास्त्रम् - द्वितीयमधिकरणम् (अध्यक्षप्रचारः) दशमोऽध्यायः (शासनाधिकारः))

सामान्य मनुष्यः स्वाभीष्टसिद्धये सामदानभेददण्डोपायान् प्रयुञ्जीत इति विश्वामित्रस्य कामधेनुसम्बद्धयत्नेन जानीयात् ।

विश्वामित्रः कामधेनुं प्राप्तुं वसिष्ठाय कोटिधेनूः ददामीत्यवदत् । परन्तु, वसिष्ठः नाङ्गीचकार ।

**'संरब्धतरमत्यर्थं ................................... तव सुव्रत ॥**
**नानावर्णविभक्तानां वयःस्थानां तथैव च ।**
**ददाम्येकां गदां कोटिं शबला दीयतां मम ॥'[8]**

(रामायणम् - बालकाण्डः - 53 सर्गः - 17 तः 20 श्लोकपर्यन्तम्)

पूर्वोक्तभावः रघुवंशमहाकाव्ये एवमुक्तः - 'एकस्याः धेनोः कृते भवान् कोटिशः घटोध्नीः धेनूः वसिष्ठाय ददातु' इति सिंहः दिलीपमवोचत् ।

**'अथैकधेनोरपराधचण्डात् गुरोः कृशानुप्रतिमाद्बिभाषे ।**
**शक्योऽस्य मन्युर्भवता विनेतुं गाः कोटिशः स्पर्शयता घटोध्नीः।'[9]** (रघुवंशः - 2-49).

सामदानभेददण्डोपायप्रयोगविषये विश्वामित्रमहर्षिः विश्वस्यादर्शमूर्तिर्भवति ।

प्रायो नरः स्वाभीष्ट साधु वा न वेति न चिन्तयति । मोहावेशेन तत्कामना सिद्धये हिंसामार्गमनुसरति । भगवद्गीतायामयं विषयः एवं प्रोक्तः -

**'कामात् क्रोधोऽभिजायते ॥'** (भगवद्गीता -2-62)

**'क्रोधाद्भवति सम्मोहः।'** (भगवद्गीता -2-63)[10]

अहिंसामार्गेण मनोरथसिद्धिं प्राप्नुयात्। साधूनां प्रथमगुणः अहिंसा ।[11] योगदर्शने पतञ्जलिः अहिंसाप्राधान्यमेवमवदत् -

**'तत्राहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः।'[12]** (पतञ्जलियोगदर्शनम् - 2-30)

अहिंसा सर्वैः सर्वकालदेशाजातिविषयादिषु अवश्यमाचरणीया इति पातञ्जलयोगदर्शने प्रोक्तम् ।

विश्वामित्रः स्वाभीष्ट साधु वा न वेति नाचिन्तयत् । मोहेन तत्कामनासिद्धये सज्जनं वसिष्ठमहर्षिं पिडितवान्।[14] अनेन ज्ञायते यत् मनुष्यः प्रकामकामो न भवेदिति । प्रथमतः स्वकामना साधु वा न वेति नरः चिन्तयेत्, स्वाभीष्टसिद्धये सज्जनान् न पीडयेदिति च विश्वामित्रस्य पूर्वोक्तकर्मणा ज्ञायते ।

विश्वामित्रः एकं मनोरथं मनसि प्राप्य तन्मनोरथसिद्धये बहुवारं बहुविधैः दीक्षया अयतत । अन्ते सः सत्कलमाप । अर्थात् प्रथमतः असाधुमनोरथार्थं अनुचितमार्गे यत्नं कुर्वन् दीक्षया तत्प्रयत्नं न त्यजति चेत् सः असाधुमनोरथः अन्ते साधुमनोरथं प्रापयति । अतः प्रथमस्तरे मनुष्यः दुष्टोऽपि प्रयत्नस्य अत्यागेन अन्ते सः शिष्टो भवति। दुष्टमनोरथप्राप्तये अविरामयत्नं कुर्वन्नरः शिष्टमनोरथकामो भवतीति विश्वामित्रस्य पूर्वोक्तप्रयत्नेन ज्ञायते ।

शरणागतरक्षणं महात्मनां लक्षणं भवति । रामायणे श्रीरामोऽपि शरणागतं शत्रोरनुजमपि विभीषणं ररक्ष।

**'स हि तं प्रतिजग्राह भार्याहर्तारमागतम् ।**
**कपोतो वानरश्रेष्ठ किं पुनर्मद्विधो जनः ।। (25)**

**आर्तो वा यदि वा दृप्तः परेषां शरणं गतः।**

**अरिः प्राणान् परित्यज्य रक्षितव्यः कृतात्मना ॥' (28)[15]**
**पञ्चतन्त्रेऽपि शरणाबस्तपरित्राणवैशिष्ट्यं कथितम् ।[16]** (रामायणम् - युद्धकाण्डः - 18 सर्गः).

अतः शरणागतपरित्राणो भवेन्नरः । त्रिश त्रिशङ्कुर्नाम राजा सशरीरं स्वर्गलोक प्राप्तये अयतत । वसिष्ठादयः तस्याभीष्टं निराकृतवन्तः । परन्तु, आत्मानं समुपागम्य प्रार्थितस्य त्रिशङ्कोः कृते विश्वामित्रः शरणमदात्, तस्मै नूतनस्वर्गनिर्माणमकरोच्च अनेन ज्ञायते यत् आत्मानं शरणं प्रपन्नं रक्षेत् । देवैः प्रार्थितः विश्वामित्रः नूतनस्वर्गनिर्माणं विरराम । अनेन 'गुरुजनानां वचनेन गुरुजनानां वचनं पालयेत्' इति वयं जानीमः ।

करुणागुणः सर्वगुणप्रधानो भवति । संस्कृतवाङ्मयं सर्वं दयायाः प्राधान्यं बोधयति। भगवद्गीता 'दया दैवीगुणसम्पत्तिः' इति वदति ।

**'दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम् ॥'[17]** (भगवद्गीता -16-2)

विश्वामित्रः करुणया यज्ञपशुरूपं शुनःशेफमरक्षत्।[18] अनेन मनुष्यः दयालुर्भवेदिति ज्ञायते । यागार्थं नरबलिरूपेण नीयमानं बालकं शुनःशेफं विश्वामित्रोऽरक्षत् । अनेन प्राणबलिनिषेधार्थं मानवाः यतन्ताम्, विपत्सु विद्यमानान् बालान् रक्षेच्चेति ज्ञायते ।

उत्तमाः विघ्नैस्ताडिताः अपि आरब्धं कर्म फलसिद्धिपर्यन्तं न त्यजन्ति । अयमेव विषयः भर्तृहरिसुभाषितेषु एवमुक्तम् -

**'प्रारभ्यते न खलु विघ्नभयेन नीचैः**
**प्रारभ्य विघ्नविहता विरमन्ति मध्याः।**
**विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः**
**प्रारब्धमुत्तमजनाः न परित्यजन्ति ॥** (भर्तृहरि सुभाषितानि - नीतिशतकम् - 27)

विश्वामित्रस्य तपोभङ्गमभवत् । ततः सः ज्ञानोदयं प्राप्य पुनः तपश्चकार ।[20] अनेन ज्ञायते यत् प्रायः मनुष्याः प्रथमस्तरे जितेन्द्रियाः न भवन्ति । अतः ज्ञानोदयं प्राप्य दीक्षया स्वलक्ष्यप्राप्तये पुनः पुनः यतताम् इति जानीयात् ।

क्रोधः अनर्थदायकः । क्रोधेन कार्यसिद्धिर्न जायते। भगवद्गीता क्रोधस्य दुष्फले एवं बोधयति -

**'क्रोधाद्भवति सम्मोहः सम्मोहात्स्मृतिविभ्रमः ।**
**स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात् प्रणश्यति ॥'[21]** (भगवद्गीता -2-63)

विश्वामित्रस्य तपोभङ्गं कर्तुं रम्भा देवेन्द्रेण प्रेषिताभवत्। तदा विश्वामित्रः तां शशाप ।[22] ततः सः क्रोधकारणेन कार्यसिद्धिं न प्राप।[23] अनेन नरः क्रोधी न भवेदिति ज्ञायते ।

विश्वामित्रः स्वतपोभङ्गकारिणीं रम्भां शप्त्वा पुनः तपः कर्तुमारभे। अन्ते सः कार्यसिद्धिमवाप, ब्रह्मर्षिरभूत्। अनेन ज्ञायते यत् मनुष्यः स्वदुर्गुणानां क्षयं कुर्यात्, दुर्जनस्थितितः दीक्षया अविरामयत्नेन च सज्जनस्थितिं प्राप्तुं यतेत इति।

**उपसंहारः-** एवं विश्वामित्रस्य जीवनं विश्वस्यादर्शं भवति । आधुनिककालेऽपि तस्य जीवनमादर्शं भवति। तदर्थं केचन दृष्टान्ताः अधो दीयन्ते ।

आधुनिककाले बहवो जनाः स्वाभीष्टसिद्धये केवलं दण्डोपायमेवानुसरन्ति। तथा न कुर्यात् । साम-दान - भेद-दण्डोपायान् क्रमशः प्रयुञ्जीतेति विश्वामित्रजीवनेन ज्ञायते ।

अधुना बहवो जनाः स्वमनोरथफल सिद्धये हिंसामार्गमेवानुसरन्ति । परन्तु, अहिंसामार्गेणैव मनोरथफलसिद्धये यतेतेति विश्वामित्रजीवनेन ज्ञायते ।

नवयुगे गुरुजनाः असाधु कर्म न कुर्यात्; भवान् सर्वदा सज्जनो भवतु' इति उपदिशन्ति । तदा दुर्गुणोपेताः जनाः युवकाद्यः प्रथमस्तरे डाव सज्जनाः भवितुं असमर्थाः भूत्वा मनस्ताप प्राप्नुवन्ति । तेभ्यः विश्वामित्रजीवन आदर्श भवति । दुष्टोऽपि क्रमेण शिष्टो भवतीति विश्वामित्रः न्यरूपयत् ।

आधुनिकयुगे शरणागतपरिरक्षणं क्षीणमभवत् । तादृशजनेभ्यः विश्वामित्रः आदर्शमूर्तिः भवति । स्वकार्यं व्यक्त्वापि शरणागतपरित्राणोऽभूत् विश्वामित्रः। अतस्सः विश्वस्यादर्शमूर्तिः ।

अधुनातनकाले आपत्सु विद्यमानान् जनान् रक्षितुं जनाः सिद्धाः न भवन्ति । तेभ्यः विश्वामित्रजीवनमादर्शं भवति ।

आधुनिककाले विश्वामित्रजीवनेन ज्ञातव्यः प्रधानांशस्तावत् 'उत्तमाः विघ्नैस्ताडिताः अपि कार्यसिद्धिपर्यन्तं यत्नं कुर्वन्ति' इति ।

अधुनातनकाले बहवो जनाः बाल्यादारभ्य क्रोधिनः दृश्यन्ते । ते क्रोधनाशनाय न यतन्ते। तेभ्यः विश्वामित्रजीवनमादर्श भवति ।

एवमाधुनिककालेऽपि सर्वकालेष्वपि च विश्वामित्रमहर्षिः विश्वस्यादर्शमूर्तिः भवति ।

## पदान्तसूची

1. श्रीमद्वाल्मीकीयरामायणम् पृष्ठसंख्या- 86.
2. तत्रैव पृष्ठसंख्या 86, 87.
3. तत्रैव पृष्ठसंख्या - 87 तः 90 पर्यन्तम्
4. तत्रैव पृष्ठसंख्या - 90
5. तत्रैव पृष्ठसंख्या 90 तः 97 पर्यन्तम्
6. हिन्दूमतम् पृष्ठसंख्या - 96
7. कौटिलीयम् अर्थशास्त्रम् पृष्ठसंख्या - 156
8. श्रीमद्वालमीकीयरामायणम् पृष्ठसंख्या - 87
9. रघुवंशमहाकाव्यमु पृष्ठसंख्या - 237, 238
10. BHAGAVAD GÎTÂ पृष्ठसंख्या - 134, 135
11. श्रीमद्‌भागवतमु (चतुर्थस्कन्धमु-2 भागमु) पृष्ठसंख्या - 145, 146.
    "साधुवु योक्क मोदटि गुणमु अहिंस ।'
    (సాధువు యొక్క మొదటి గుణము అహింస.)
    'अहिंसया द्वन्द्वतितिक्षया च ।। (भागवतम् -4-22-24) '
12. योगदर्शनम् पृष्ठसंख्या - 91
13. तत्रैव पृष्ठसंख्या - 93
14. श्रीमद्वाल्मीकीयरामायणम् पृष्ठसंख्या - 88
    'रामायणम् - बालकाण्डः - 54-10'
15. तत्रैव पृष्ठसंख्या - 482, 483
16. पञ्चतन्त्रम् पृष्ठसंख्या 61 तः 71 पर्यन्तम्
17. BHAGAVADGTTA (as it is) पृष्ठसंख्या - 647
18. श्रीमद्वाल्मीकीयरामायणम् पृष्ठसंख्या 93, 94
19.
20. श्रीमद्वालमीकीयरामायणम् पृष्ठसंख्या - 94
    (रामायणम् - बालकाण्डः - 62-28)
21. BHAGAVAD GITA (as it is) पृष्ठसंख्या - 135
22. श्रीमद्वाल्मीकीयरामायणम् पृष्ठसंख्या 95, 96
23. तत्रैव पृष्ठसंख्या - 96
    'कोपेन च महातेजास्तपोपहरणे कृते ।
    इन्द्रियैरजितै राम न लेभे शान्तिमात्मनः ॥'

(रामायणम् - बालकाण्डः-64-26)

## आधारग्रन्थसूची


1. श्रीमद्वाल्मीकीयरामायणम् - वाल्मीकिमहर्षिः - गीताप्रेस - गोरखपुर (मूलमात्रम्) आठवाँ मुद्रण.

   ISBN: 81-293-0250-0-

2. हिन्दूमतम् - महामहोपाध्याय आचार्य पुल्लेल श्रीरामचन्द्रुडु- श्रीजयलक्ष्मी पब्लिकेषन्स् - हैदराबादु द्वितीयमुद्रण - 2018.

3. कौटिलीयम् अर्थशास्त्रम् - महामहोपाध्याय आचार्य पुल्लेल श्रीरामचन्द्रडु - श्रीजयलक्ष्मी पब्लिकेषन्स् - हैदराबादु - पुनर्मुद्रण - 2020.

4. रघुवंशमहाकाव्यमु - गोल्लापिन्नि सदाशिवशास्त्री - ज्ञानश्री आर्षविद्यागुरुकुलमु प्रचुरण - एमेस्को - हैदराबाद् - चतुर्थमुद्रण - 2021

5. BHAGAVAD GITA (as it is) - His Divine grace A.C.Bhaktivedanta Swami Prabhupāda. The Bhaktivedanta Book Trust - Mumbai 4th print - 2019.

   ISBN: 978-93-84564-19-3.

6. श्रीमद्भागवतमु (चतुर्थस्कन्धमु - 2 भागमु) श्री. श्रील. 51. सि. भक्तिवेदान्त -स्वामि प्रभुपादुलु - भक्तिवेदान्त बुक् ट्रस्ट् - मुम्बई - द्वितीयमुद्रण - 2011

7. योगदर्शनम् - आचार्य श्री पुल्लेल श्रीरामचन्द्रुडु - आर्षविज्ञान ट्रस्टु - हैदराबादु - प्रथममुद्रण – 1992

8. पञ्चतन्त्रम् - (काकोलूकीयम्, लब्धप्रणाशम्, अपरीक्षितकारकं च) -अनुवादकः – श्रीजीरेड्डि बालचेन्नारेडि प्रकाशकाः - संस्कृतभाषाप्रचारसमितिः - भाग्यनगरम् (हैदराबादु) - प्रथममुद्रणम् – 1989

9. BHARTRHARI'S S'ATAKATRAYAM - Kamayani Mahodaya Chaukhamba Sanskrit Pratishthan - Delhi 2003

   ISBN: 81-7084-193-8